| अथ प्रकीर्णकानि । | प्रायश्चित्तानि । | तदशक्तौ धेनुदानम् । | तदशक्तौ मूल्यदानम् । | दक्षिणा । |
|---|---|---|---|---|
| | पूर्व्वोक्तकालादल्पकालसङ्करे चान्द्रायणम् । | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |
| | स्वल्पतरे पराकः । | ५ धेनवः । | १५ कार्षापणाः । | यथाशक्ति । |
| | अत्यन्तस्वल्पकाले कृच्छ्रद्वयम् । | २ धेनू । | ६ कार्षापणाः । | यथाशक्ति । |
| | शूद्रस्यात्र प्राजापत्यम् । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| | चाण्डालादिसङ्करे गृहादिशुद्धिर्यथा । भवनदहनं अर्थात् हुताशनज्वालासंस्पृष्टम् । पवनं अर्थात् पूर्व्वमृत्तिकाकर्षणेन मृत्तिकान्तरदानम् । सर्व्वमृण्मयभाण्डभेदनम् । दारवाणां तक्षणम् । शङ्खशुक्तिरजतसुवर्णचेलानामद्भिः प्रक्षालनम् । कांस्यताम्राणामाकरे अर्थादग्नौ शुद्धिः । सौवीरपयोदधितक्राणां परित्यागः । लाक्षादिरसधान्यादिद्रव्याणां रक्षणम् । घृतादीनां तापनञ्च । | | | |
| | एकस्मिन्नेव कूपे द्विजानां चाण्डालानाञ्च सह जलपानं कुर्व्वतां संसर्गदुष्टानां उपवासः । पञ्चगव्यपानञ्च । | ० | ॥० पणाः । | यथाशक्ति । |
| | आलापत्यारोगिगर्भिणीवृद्धानां नक्तम् । | ० | २ रजतरक्तिके । | यथाशक्ति । |
| | बालानां प्रहरद्वयमभोजनम् । | ० | १ रजतरक्तिका । | यथाशक्ति । |
| | चर्म्मकारादीनामविज्ञातसङ्करे तु चाण्डालसङ्करप्रायश्चित्तस्य षष्ठो भागः कर्त्तव्यः । संहतानां एकस्मिन्नुपहते तस्यैव शोधनम् । न तु तत्स्पृष्टिनां सर्व्वेषां शोधनम् । एकशाखापाषाणादौ चाण्डालादिभिः सहारोहणे ब्राह्मणस्य स्नानमात्रम् । | | | |
| | तत्र फलभोजने ब्राह्मणानुज्ञापनं सचेलस्नानं अहोरात्रोपवासः पञ्चगव्यपानञ्च । एतदवधाने । | ० | ॥० पणाः । | यथाशक्ति । |
| | सन्निधाने त्रिरात्रोपवासः । पञ्चगव्यपानञ्च । एतदुभयं ज्ञानविषयम् । अज्ञाने एकवृक्षादौ चाण्डालादिभिः सह फलभोजने अघमर्षणम् । एकावयवविदारा परम्परास्पर्शेऽपि स्नानादिकम् । अथापवादः ।"रथ्याकर्द्दमतोयानि नावः पन्थास्तृणानि च । स्पर्शनान्न प्रदूष्यन्ति पक्वेष्टरचितानि च ॥" तृणानि तृणसमूहः । पक्वेष्टरचितानि मठादीनि । द्वितीयसंसर्गितृतीयसंसर्गिणोर्हस्तपादप्रक्षालनपूर्व्वकमाचमनम् । चतुर्थसंसर्गे दोषाभावः । | ० | १॥० कार्षापणः । | यथाशक्ति । |
| | इत्यस्पृश्यस्पर्शप्रायश्चित्तम् ॥ * ॥ | | | |
| अथ रहस्यपापानि । | रहस्यकृते पापे रहस्यप्रायश्चित्तं करणीयम् । अन्येनावेदितमित्यर्थः । तत्र यदि कर्त्ता स्वयं प्रायश्चित्तानभिज्ञस्तदा कस्यचिद्रहस्यपापस्य किं रहस्यप्रायश्चित्तमिति सामान्येन प्रायश्चित्ताभिज्ञं पृष्ट्वा रहस्यं प्रायश्चित्तं कुर्य्यात् । तत्र यदि | | | |